# .. Ishopanishad with Shankaracharya's commentary ..
## ॥ ईशावास्योपनिषदि शांकरभाष्यसहितं ॥

ॐ ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१॥

" ईशावास्यम्" इत्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्याऽऽत्मनो याथात्म्यप्रकाशकत्वात् । याथात्म्यं चाऽऽत्मनः शुद्धत्व, अपापविद्धत्व, एकत्व, नित्यत्व, अशरीरत्व, सर्वगतत्वादि वक्ष्यमाणम् । तच्च कर्मणा युक्त विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः । न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्? सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् । गीतानां मोक्षधर्माणां चैवम्परत्वात् । तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि । यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवान् इत्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति । तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनाऽऽत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानं उत्पादयन्ति इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान्मन्त्रान् सङ्क्षेपतो व्याख्यास्यामः ।

" ईशावास्यम्" इत्यादि — ईशा ईष्ट इतीट् तेनेशा । ईशिता परमेश्वरः परमात्मा सर्वस्य । स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया, तेन स्वेन रूपेणाऽऽत्मनेशा वास्यमाच्छादनीयम् । किम्? " इदं सर्वं" यत्किञ्चिज्जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनाऽऽत्मनेशेन प्रत्यगात्मतयाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना । यथा चन्दनागर्वादेरुदकादि-सम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाऽऽच्छाद्यते स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं " जगत्यां" पृथिव्यां जगत्यां इत्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया व्यक्तं स्यात्? एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो, न कर्मसु । " तेन त्यक्तेन", त्यागेन इत्यर्थः । न हि त्यक्तो मृतः पुत्रो वा भृत्यो वाऽऽत्मसम्बन्धिताया अभावादात्मानं पालयति,

अतस्त्यागेनेत्ययमेव वेदार्थः । "भुञ्जीथाः" पालयेथाः । एवं त्यक्तैषणस्त्वं "मा गृधः", गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम् । "कस्यस्विद्धनं" कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः । स्विदित्यनर्थको निपातः ।

अथवा "मा गृधः" । कस्मात्? "कस्यस्विद्धनम्" इति आक्षेपार्थो, न कस्यचिद्धनमस्ति, यद्गृध्येत? 'आत्मैवेदं सर्वम्' इतीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीः — इत्यर्थः ॥१॥

> कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः ।
> एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतयाऽऽत्मा रक्षितव्य इत्येष वेदार्थः । अथेतरस्यानात्मज्ञतयाऽऽत्मग्रहणायाशक्तस्य इदमुपदिशति मन्त्रः — "कुर्वन्नेव" इति । "कुर्वन्नेवेह" निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि "जिजीविषेज्" जीवितुमिच्छेत् शतसङ्ख्याकाः "समाः" संवत्सरान् । तावद्धि पुरुषस्य परमायुर्निरूपितम् । तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते । एवमेवं प्रकारेण "त्वयि" जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात्प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न "लिप्यते" कर्मणा न लिप्स्यस, इत्यर्थः । अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् । 'कथं पुनरिदमवगम्यते पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता, द्वितीयेन तदशक्तस्य कर्मनिष्ठा', इति उच्यते । ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्? इहाप्युक्तं, 'यो हि जिजीविषेत्स कर्म कुर्वन् । ईशा वास्यमिदं सर्वं, तेन त्यक्तेन भुञ्जीथा, मा गृधः कस्यस्विद्धनम्, इति च । "न जीविते मरणे वा गृधिं कुर्वीतारण्यमियाद्" इति च पदम् । ततो न पुनरियादिति संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति — "इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण"[1] ।

निवृत्तिमार्गेणैषणात्रयस्य त्यागः । तयोः संन्यासपथ एवातिरेचयति । "न्यास एवात्यरेचयद्" इति च तैत्तिरीयके ।

[1] नारायणोपनिषद्वाक्यमपि भिन्नाधिकारित्वे प्रमाणयति — आनन्दगिरि टीका

" द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च विभावितः" ॥

— इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता । विभागं चानयोर्दर्शयिष्यामः ॥ २॥

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३॥

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते — " असुर्याः", परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम । नामशब्दोऽनर्थको निपातः । ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि । " अन्धेन" अदर्शनात्मकेन, अज्ञानेन " तमसाऽऽवृता" आच्छादितास्तान्स्थावरान्तन् " प्रेत्य" त्यक्त्वेमं देहमभिगच्छन्ति यथाकर्म यथाश्रुतम् । " ये के चाऽऽत्महनः" — आत्मानं घ्नन्ति, इति आत्महनः । के ते जनाः? येऽविद्वांसः । कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्याऽऽत्मनस्तिरस्करणात् । विद्यमानस्याऽऽत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना " आत्महन" उच्यन्ते । तेन ह्यात्महननदोषेण संसरन्ति ते ॥ ३॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४॥

यस्याऽऽत्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते नाऽऽत्महनः । तत्कीदृशमात्मतत्त्वमित्युच्यते, " अनेजद्" इति । " अनेजद्", न एजत् । " एजृ कम्पने" । ' कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपम्', इत्यर्थः । तच्चैकं सर्वभूतेषु । " मनसः" सङ्कल्पादिलक्षणाद् " जवीयो" जववत्तरम् । ' कथं विरुद्धमुच्यते, ध्रुवं निश्चलमिदं मनसो जवीय, इति च?' — नैष दोषः, निरुपाध्युपाधिमत्त्वेनोपपत्तेः । तत्र निरुपाधिकेन स्वेन रूपेणोच्यते, " अनेजदेकम्" इति । मनसोऽन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्य उपाधेरनुवर्तनादिह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम् । ' तस्मिन्,

मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवाऽऽत्मचैतन्य अवभासो गृह्यते, अतो मनसो जवीय' इत्याह — " नैनद्देवा" । द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाऽऽप्नुवन्न प्राप्तवन्तः । तेभ्यो मनो जवीयो, मनोव्यापारव्यवहितत्वात् आभासमात्रमपि आत्मनो नैव देवानां विषयीभवति । यस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतम् । व्योमवद् व्यापित्वात् । ' सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत', इत्येतदाह — " तद्धावतो" । द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागिन्द्रियप्रभृतीनत्येत्यतीत्य गच्छतीव । इवार्थं स्वयमेव दर्शयति — " तिष्ठद्" इति । स्वयमविक्रियमेव सदित्यर्थः । " तस्मिन्" आत्मतत्त्वे सति नित्यचैतन्यस्वभावे, " मातरिश्वा" — ' मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा' वायुः सर्वप्राणभृत्क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ, स मातरिश्वा । " अपः" कर्माणि प्राणिनां चेष्टालक्षणानि । अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि " दधाति" विभजतीत्यर्थः । धारयतीति वा । " भीषाऽस्माद्वातः पवते" (तै.उ. २.८) इत्यादिश्रुतिभ्यः । सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥ ४॥

> तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
> तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥ ५॥

न मन्त्राणां जामिताऽस्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह " तदेजति" इति । तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति तदेव च " नैजति" स्वतो नैव चलति स्वतोऽचलमेव सच्चलतीवेत्यर्थः । किञ्च " तद्दूरे" वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव, तत् " उ" अन्तिक इति च्छेदः । " तद्वन्तिके" समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च, तदन्तरभ्यन्तरे " अस्य सर्वस्य", " य आत्मा सर्वान्तर" इति श्रुतेः । " अस्य सर्वस्य" जगतो नामरूपक्रियात्मकस्य " तदु" अपि " सर्वस्य" अस्य " बाह्यतः" व्यापकत्वाद्, आकाशवन्निरतिशयसूक्ष्मत्वादन्तः । " प्रज्ञानघन एव" इति च शासनान्निरन्तरं च ॥ ५॥

> यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
> सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६॥

“ यस्तु” स्थावरान्तानि “ आत्मन्येवानुपश्यति” ‘ आत्मव्यतिरिक्तानि न पश्यति’ इत्यर्थः । “ सर्वभूतेषु” च तेष्वेव “ चाऽऽत्मानं” तेषामपि भूतानां स्वमात्मानमात्मत्वेन, यथाऽस्य देहस्य कार्यकारणसङ्घातस्याऽऽत्माहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता “ केवलो निर्गुणः” (श्वे.उ. ६.११) अनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवाऽऽत्मेति सर्वभूतेषु चाऽऽत्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न “ विजुगुप्सते” विजुगुप्सां घृणां न करोति । प्राप्तस्यैवानुवादोऽयम् । सर्वा हि घृणाऽऽत्मनोऽन्यद् दुष्टं पश्यतो भवत्यात्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव “ ततो न विजुगुप्सत” इति ॥ ६॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७॥

इममेवार्थमन्योऽपि मन्त्र आह — “ यस्मिन्सर्वाणि भूतानि” । यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि “ सर्वाणि” परमार्थात्मदर्शनाद् “ आत्मैवाभूद्” आत्मैव संवृत्तः परमार्थवस्तु “ विजानतस्तत्र” तस्मिन्काले तत्राऽऽत्मनि वा “ को मोहः कः शोकः”? शोकश्च मोहश्च कामकर्मबीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः । “ को मोहः कः शोक” इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासम्भवप्रदर्शनात्, सकारणस्य संसरस्य अत्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः
समाभ्यः ॥ ८॥

‘ योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षणक?’ इत्याह अयं मन्त्रः — “ स पर्यगात्” । स यथोक्त आत्मा “ पर्यगात्” परि समन्तादगाद्गतवानाकाशवद् व्यापीत्यर्थः । शुक्रं शुद्धं ज्योतिष्मद् दीप्तिमानित्यर्थः । “ अकायम्”, ‘ अशरीरो लिङ्गशरीरवर्जित’ इत्यर्थः । “ अव्रणम्” अक्षतम् । “ अस्नाविरम्” स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम् । अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः । “ शुद्धम्” निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः । “ अपापविद्धम्” धर्माधर्मादिपापवर्जितम् । “ शुक्रम्” इत्यादीनि वचांसि पुंलिङ्गत्वेन परिणेयानि “ स पर्यगाद्” इत्युपक्रम्य “ कविर्मनीषी” इत्यादिना पुंलिङ्गत्वेन उपसंहारात् । “ कविः” क्रान्तदर्शी, सर्वदृक् । “ नान्योऽतोऽस्ति द्रष्टा”

इत्यादिश्रुतेः । “ मनीषी” मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः ।
“ परिभूः” सर्वेषां पर्युपरि भवतीति परिभूः । “ स्वयम्भूः”
स्वयमेव भवतीति । येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव
भवतीति स्वयम्भूः । स नित्यमुक्त ईश्वरो “ याथातथ्यतः”
सर्वज्ञत्वाद्यथातथा भावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतो
अर्थान्कर्तव्यपदार्थान्, “ व्यदधाद्” विहितवान्, यथानुरूपं
व्यभजद्, इत्यर्थः । “ शाश्वतीभ्यो” नित्याभ्यः समाभ्यः
संवत्सराख्येभ्यः प्रजापतिभ्यः इत्यर्थः ॥ ८॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाँ रताः ॥ ९॥

अत्राऽद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः । “ ईशावास्यमिदं सर्वम्”, “ मा गृधः कस्यस्विद् धनम्” इति । अज्ञानां जिजीविषूणां ज्ञाननिष्ठाऽसम्भवे, “ कुर्वन्नेवेह कर्माणि जिजीविषेद्” इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः । अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः, “ सोऽकामयत जाया मे स्याद्” (बृ.उ. १.४.१७) इत्यादिना अज्ञस्य कामिनः कर्माणीति “ मन एवास्याऽत्मा वाग्जाया” (बृ.उ. १.४.१७) इत्यादिवचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते । तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनाऽऽत्मस्वरूपावस्थानम् । जायाद्येषणात्रय संन्यासेन चाऽऽत्मविदां कर्मनिष्ठाप्रातिकूल्येन आत्मस्वरूपनिष्ठैव दर्शिता — “ किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक” (बृ.उ. ४.४.२२) इत्यादिना । ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्यो “ असुर्या नाम त” इत्यादिनाऽविद्वन्निन्दाद्वारेणाऽऽत्मनो याथात्म्यं “ स पर्यगाद्” इत्येतदन्तैर्मन्त्रैरुपदिष्टम् । ‘ ते ह्यत्राधिकृता न कामिन’, इति । तथा च श्वेताश्वतराणां मन्त्रोपनिषदि “ अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्” (श्वे.उ. ६.२१) इत्यादि विभज्योक्तम् । ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते — “ अन्धं तम” इत्यादि । ‘ कथं पुनरेवमवगम्यते न तु सर्वेषाम्?’ इति उच्यते, अकामिनः साध्यसाधनभेदोपमर्देन “ यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः, तत्र को मोहः कः शोक एकत्वमनुपश्यत” इति यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति । इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते । तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः, शास्त्रतो वा,

तदिहोच्यते । यद्दैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं, न परमात्मज्ञानम् । " विद्यया देवलोक" इति पृथक्फलश्रवणात् । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैवैकैकस्य पृथक्फलश्रवणात् । " विद्यया तदारोहन्ति", " विद्यया देवलोक", " न तत्र दक्षिणा यान्ति", " कर्मणा पितृलोक" इति । नहि शास्त्रविहितं किञ्चिद् अकर्तव्यतामियात् । तत्रान्धं तमोऽदर्शनात्मकं तमः प्रविशन्ति । " के" येऽविद्यां विद्याया अन्याऽविद्या तां कर्मेत्यर्थः । कर्मणो विद्याविरोधित्वात् । तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपास्ते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततस्तस्मादन्धात्मकात्तमसो " भूय इव" बहुतरमेव " ते" तमः प्रविशन्ति । " के" कर्म हित्वा " ये" " उ" ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः ॥९॥

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह, अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्यादित्यर्थः । " अन्यदेव" इत्यादि । अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति, " विद्यया देवलोको", " विद्यया तदारोहन्ति" इति श्रुतेः । " अन्यदाहुरविद्यया" कर्मणा क्रियते, " कर्मणा पितृलोक" इति श्रुतेः । इत्येवं " शुश्रुम" श्रुतवन्तो वयं " धीराणां" धीमतां वचनम् । य आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च " विचचक्षिरे" व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत, इत्यर्थः ॥१०॥

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥११॥

यत एवमतो " विद्यां चाविद्यां च" देवताज्ञानं कर्म चेत्यर्थः, " यस्तद्" एतद् " उभयं सह" एकेन पुरुषेणानुष्ठेयं " वेद" तस्यैव समुच्चयकारिण एवैकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते — " अविद्यया" कर्मणाऽग्निहोत्रादिना " मृत्युम्" स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं " तीर्त्वा" अतिक्रम्य " विद्यया" देवताज्ञानेन " अमृतम्" देवतात्मभावं " अश्नुते" प्राप्नोति । तद्धि अमृतमुच्यते, यद्देवतात्मगमनम् ॥११॥

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।

ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥१२॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते — " अन्धं तमः प्रविशन्ति येऽसम्भूतिम्" सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिस्तस्या अन्या " असम्भूतिः" प्रकृतिः कारणमविद्याऽव्याकृताख्या तामसम्भूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकां " उपासते" ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति । " ततः" तस्मादपि " भूयो" बहुतरमिव " तमः" प्रविशन्ति " य उ सम्भूत्याम्" कार्यब्रह्मणि हिरण्यगर्भाख्ये " रताः" ॥१२॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३॥

अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह — " अन्यदेव" इति । अन्यदेव पृथगेवाऽऽहुः फलं " सम्भवात्" सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त, इत्यर्थः । तथा च, " अन्यदाहुरसम्भवाद्" असम्भूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तं, " अन्धं तमः प्रविशन्ति" इति प्रकृतिलय इति च पौराणिकैरुच्यते । इत्येवं " शुश्रुम धीराणां" वचनं " ये नस्तद्विचचक्षिरे" व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥१३॥

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥१४॥१॥

यत एवमतः समुच्चयः सम्भूत्यसम्भूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्च, इत्याह — " सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह" ।

" विनाशेन" विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणाऽभेदेनोच्यते " विनाश" इति । तेन तदुपासनेन अनैश्वर्यमधर्मकामादिदोषजातं च " मृत्युं तीर्त्वा" हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम् । तेनानैश्वर्यादिमृत्युमतीत्य " असम्भूत्या" अव्याकृतोपासनयाऽमृतं प्रकृतिलयलक्षणमश्नुते । " सम्भूतिं च विनाशं च" इत्यत्र अवर्णलोपेन निर्देशो द्रष्टव्यः, प्रकृतिलयफलश्रुत्यनुरोधात् ॥१४॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥

मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् ।एतावती संसारगतिः । अतः परं पूर्वोक्तं " आत्मैवाभूद्विजानत" इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्ति-निवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने, प्रवर्ग्यान्तं ब्राह्मणमप्युक्तम् । निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तं, तत्र निषेकादिश्मशानान्तं कर्म कुर्वञ्जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया, तदुक्तं " विद्यां चाविद्यां च यस्तद्वेदोभयं सह, अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत" इति तत्र केन मार्गेणामृतत्वमश्नुत, इत्युच्यते — " तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष" (बृ.उ. ५.५.२) एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सति आत्मानमात्मनः प्राप्तिद्वारं याचते, " हिरण्मयेन पात्रेण" । हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत् । तेन पात्रेणेवापिधानभूतेन " सत्यस्य" एवाऽदित्यमण्डलस्थस्य ब्रह्मणो " अपिहितम्" आच्छादितं " मुखम्" द्वारं " तत्त्वम्" हे " पूषन्नपावृणु" अपसारय " सत्यधर्माय" तव सत्यस्योपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यम् । अथवा, यथाभूतस्य धर्मस्यानुष्ठात्रे " दृष्टये" तव सत्यात्मन उपलब्धये ॥१५॥

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् ।
समूह तेजः यत् ते रूपं कल्याणतमं तत् ते पश्यामि ॥१६॥

" पूषन्" इति — हे पूषन्, जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छतीत्येकर्षिः । हे " एकर्षे" तथा सर्वस्य संयमनाद्यमः । हे " यम", तथा रश्मीनां प्राणानां रसानां च स्वीकरणात्सूर्यः । हे " सूर्य" प्रजापतेरपत्यं प्राजापत्यः ।हे " प्राजापत्य" " व्यूह" विगमय रश्मीन्स्वान् । " समूह" एकी कुरु, उपसंहार ते " तेजः" तापकं ज्योतिः । " यत्ते" तव " रूपं कल्याणतमम्" अत्यन्तशोभनं, " तत्ते" तवाऽऽत्मनः प्रसादात् " पश्यामि" ॥१६॥

योऽसावसौ पुरुषः सोऽहमस्मि ॥१७॥

किञ्चाहं न तु त्वां भृत्यवद्याचे, " योऽसावादित्य" मण्डलस्थो व्याहृत्यवयवः " पुरुषः" पुरुषकारत्वात् पूर्णं वाऽनेन प्राणबुद्ध्यात्मना जगत्समस्तमिति

पुरुषः पुरि शयनाद्वा पुरुषः “ सोऽहमस्मि” भवामि ॥१७॥

वायुरनिलममृतमथेदं भस्मांतꣳ शरीरम् ॥१८॥

“ वायुः” इति अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकं, “ अनिलम्”, “ अमृतम्”, ‘ सूत्रात्मानं प्रतिपद्यताम्’ इति वाक्यशेषः । लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम् । मार्गयाचनसामर्थ्यात् । अथेदं शरीरमग्नौ हुतं “ भस्मान्तम्” भूयात् ॥१८॥

ॐ क्रतो स्मर कृतꣳ स्मर ।
ॐ क्रतो स्मर कृतꣳ स्मर ॥१९॥

“ ॐ”इति यथोपासनं ॐप्रतीकात्मकत्वात्सत्यात्मकमग्न्यात्मकब्रह्मभेदेनोच्यते । हे “ क्रतो” सङ्कल्पात्मक, “ स्मर” यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मरैतावन्तं कालं भावितं “ कृतम्” अग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । “ क्रतो स्मर कृतं स्मर” इति पुनर्वचनमादरार्थम् ॥१९॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥२०॥२॥

पुनरन्येन मन्त्रेण मार्गं याचते — “ अग्ने नय” इति । हे “ अग्ने” “ नय” गमय “ सुपथा” शोभनेन मार्गेण । “ सुपथा” इति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । निर्वण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा “ नय” । “ राये” धनाय कर्मफलभोगायेत्यर्थः । “ अस्मान्” यथोक्त धर्मफलविशिष्टान्, “ विश्वानि” सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानि वा “ विद्वान्” जानन् । किं च “ युयोधि वियोजय” विनाशयास्मदस्मत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम् । ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम, इत्यर्थः । किन्तु वयमिदानीं ते न शक्नुम परिचर्यां कर्तुं “ भूयिष्ठाम्” बहुतरां “ ते” “ नमउक्तिम्” नमस्कारवचनं परिचरेम, इत्यर्थः ॥२०॥

“ अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते”, “ विनाशेन मृत्युं तीर्त्वाऽसम्भूत्याऽमृतमश्नुत” इति श्रुत्वा केचित् संशयं कुर्वन्ति ।

अतस्तन्निराकरणार्थं सङ्क्षेपतो विचारणां करिष्यामः । तत्र तावत्किं निमित्तः संशय? इत्युच्यते । “ विद्या”शब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वं च ।

ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः । सत्यम् । विरोधस्तु नावगम्यते, विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं, तथा तद्विरोधाविरोधावपि । यथा च “ न हिंस्यात्सर्वा भूतानि” इति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते — “ अध्वरे पशुं हिंस्याद्” इति । एवं विद्याविद्ययोरपि स्याद्, विद्याकर्मणोश्च समुच्चयः ।

न — “ दूरमेते विपरीते विषूची अविद्या या च विद्या” (क.उ. १.२.४) इति श्रुतेः हेतुस्वरूपफलविरोधात् । “ विद्यां चाविद्यां च” इति वचनादविरोध, इति चेन्न, विद्याऽविद्याविरोधाविरोधयोर्विकल्पासम्भवात् । समुच्चयविधानादविरोध एवेति चेन्न, समसम्भवानुपपत्तेः । क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न, विद्योत्पत्ताविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः । न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेव आश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा । “ यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः, तत्र को मोहः कः शोक एकत्वमनुपश्यत” इति शोकमोहाद्यसम्भवश्रुतेः । अविद्याऽसम्भवात् तदुपादानाय कर्मणोऽपि अनुपपत्तिमवोचाम । “ अमृतमश्नुत” इत्यापेक्षिकममृतं, “ विद्या”शब्देन परमात्मविद्याग्रहणे “ हिरण्मयेन” इत्यादिना द्वारमार्गादियाचनं अनुत्पन्नं स्यात्? तस्माद्, उपासनया समुच्चयो, न परमात्मविज्ञानेन, इति यथास्माभिर्व्याख्यात एव मन्त्रार्थ, इत्युपरम्यते ॥

इति श्रीगोविन्दभगवत्पादशिष्य श्रीशङ्करभगवतः कृतौ

वाजसनेयिसंहितोपनिषद्भाष्यं सम्पूर्णम्

Encoded by Shrisha Rao (shrao at dvaita.org)
Proofread by Meera Tadipatri (mtadipatri at dvaita.net)

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org